**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत विशारद (बी.ए.) – बहिस्थ

**परीक्षा : मे –२०२४**

**सत्र ६ वे**

**विषय: कादंबरी** (19E462)

| **दिनांक : २३/०५/२०२४** | **गुण : ८०** | **वेळ : स.१०.०० ते १.००** |
|---|---|---|

**प्र. १. चतुर्णामनुवादं ससन्दर्भं लिखत।** **(२८)**

१. कटु क्वणन्तो मलदायकाः खलास्त्युदन्त्यलं बन्धनशृङ्खला इव।
मनस्तु साधुध्वनिभिः पदे पदे हरन्ति सन्तो मणिनूपुरा इव।।
सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतम्।
तदैव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम्।।

२. यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकरा:, रतेषु केशग्रहा:, काव्येषु दृढबन्धा: शास्त्रेषु चिन्ता, स्वप्नेषु विप्रलम्भा: छत्रेषु कनकदण्डा: ध्यजेषु प्रकम्पा: गीतेषु रागविलसितानि, करिषु मदविकारा:, चापेषु गुणच्छेदा: गवाक्षेषु जालमार्गा: शशिकृपाणकवचेषु कलङ्का: रतिकलहेषु दूतप्रेषणानि सार्यक्षेषु जालमार्गा: शशिकृपाणकवचेषु कलङ्का:,रतिकलहेषु दूतप्रेषणानि सार्यक्षेषु शून्यगृहा:, न प्रजानामासन्। यस्य च परलोकाद्भयम्, अन्त:पुरिकाकुन्तलेषु भङ्ग:,नूपुरेषु मुखरता, विवाहेषु करग्रहणम् अनवरतमखाग्निधूमेनाश्रुपात:, तुरङ्गेषु कशाभिघात: मकरध्वजे चापध्वनिरभूत।

३. नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनारसिंहरूपाडम्बरम्, एकविक्रमाक्रान्तसकलमुवनतलो विक्रमत्रयायासितभुवनत्रयं च जहासेव च वासुदेवम्, अतिचिरकाललग्नमतिक्रान्तकृनृपति–सहस्रसम्पर्ककलङ्कमिवक्षालयन्ती यस्य विमले कृपाणजलधाराजले चिरमुवास राजलक्ष्मी:। यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

४. एवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत् आस्तां तावत्सर्वम् अपनयतु न: कुतूहलम्। आवेदयतु भवानादित: प्रभृति कार्त्स्येनात्मनो जन्म कस्मिन्देशे, भवान्कथं जात: केन वा नाम कृतम्, का त माता, कस्ते पिता, कथं वेदानामागम:, कथं शास्त्राणां परिचय:, कुत: कला आसादिता: किंहेतुकं जन्मान्तरानुस्मरणम्, उत वरप्रदानम्, अथवा विहङ्गवेषधारी कश्चिच्छन्नं निवससि, क्व वा पूर्वमुषितम् कियद्वा वय:, कथं पञ्जरबन्धनम्, कथं चाण्डालहस्तगमनम्, इह वा कथमागमनम् इति। वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना, पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत् देव महतीयं कथा। यदि कौतुकमाकर्ण्यताम्।

5. स कदाचिदनवरतदोलायमानरत्नवलयो घर्घरिकास्फालनप्रकम्पझणझणायमानमणिकर्णपूरः स्वयमारब्धमृदङ्गवाद्यः संगीतकप्रसङ्गेन, कदाचिदविरलविमुक्तशरासारशून्यीकृतकाननो, कदाचिच्छास्त्रालापेन, कदाचिद् आख्यानकाख्यायिकेतिहासपुराणाकर्णनेन, कदाचिदालेख्यविनोदेन, कदाचिद्वीणया, कदाचिद्दर्शनागतमुनिजनचरणशुश्रूषया, कदाचिदक्षरच्युतकमात्राच्युतकबिन्दुमतीगूढचतुर्थपादप्रहेलकाएदानादिभिर्वनितासंभोगसुखपराङ्मुखः सुहृत्परिवृतो दिवसमनैषीत्।

**प्र. २. ससंदर्भं स्पष्टीकुरुत। (केवलं पञ्चः)** **(३०)**

१. विधातुः अस्थाने सौन्दर्यनिष्पादनप्रयत्नः।

२. वैनतेय इव विनतानन्दजननः।

३. को दोषः, प्रवेश्यताम्।

४. कुपतिमपि कलत्रवल्लभम्।

५. रक्तचरणानिव कात्यायनीम्।

६. वर्णोच्चारणे स्पष्टता, स्वरे च मधुरता।

७. किमत्र चित्रम्।

**प्र. ३.** **टिप्पणीद्वयं लिखत।** **(२२)**

१. शूद्रकस्य राजसभा।

२. बाणस्य वर्णनचातुरी।

३. बाणस्य पूर्वजाः।

-------